Roll No. ........................

(05/25)

# 5548

## B.A. (General) EXAMINATION

(For Batch 2020 & Onwards)

(Fourth Semester)

SANSKRIT

(Elective)

*Time : Three Hours* *Maximum Marks* : 80

**नोट** : सर्वे: प्रश्ना: समाधेया: ।

1. अधोलिखिता: सर्वे प्रश्ना: संक्षिप्तोत्तरेण लेखनीया:– 8×2=16

(क) राजा दिलीप: कस्य आश्रमं गच्छति ?

(ख) पुत्रहीना का आसीत् ?

(ग) शिवराज-विजयस्य आरम्भे कस्य देवस्य वर्णनम् अस्ति ?

(घ) योगीराज: कुत्र वसति स्म ?

(ङ) गम् धातोः णिजन्त-रूपाणि लट्लकारे लिखत ।

(च) भाववाच्यस्य सोदाहरणं वर्णनं कुरुत ।

(छ) संयोग-संज्ञा-विधायकं सूत्रं लिखत ।

(ज) करण-कारकस्य सोदाहरणं वर्णनं कुरुत ।

2. (क) कयोश्चित् **द्वयोः** श्लोकयोः सप्रसंग व्याख्या कार्या— 2×5=10

(i) शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

(ii) तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेंदुरिन्दुः क्षीरनिधाविव ॥

(iii) तस्य दाक्षिण्यरुढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥

(iv) इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रं ऋषिस्तस्थौ सुप्तमीन इव ह्रदः ॥

(ख) **एकस्य** प्रश्नस्य उत्तरं विस्तरेण देयम्-
(आलोचनात्मकः प्रश्नः) : 1×6=6

(i) रघुवंशस्य प्रथमसर्गस्य कथासारं लिखत ।

(ii) राज्ञः दिलीपस्य चरित्र-चित्रणं कुरुत ।

3. (अ) अनुच्छेद-द्वयस्य सप्रसङ्ग-व्याख्या विधेया-

4×2=8

(i) तस्मिन पर्वते आसीदेको महान् कन्दरः । तस्मिन् एव महामुनिरेकः समाधौ तिष्ठति स्म । कदा स समाधिम् अङ्गीकृतवान् इति कोऽपि न वेत्ति । ग्रामणी ग्रामीणः ग्रामाः समागत्य मध्ये-मध्ये तं पूजयन्ति प्रणमन्ति स्तुवन्ति च । तं च केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये च मार्कण्डेय इति विश्वसन्ति स्म । स एव अयम् अधुना शिखराद् अवतरन् ब्रह्मचारि-बहुभ्याम् अदर्शि ।

(ii) "भगवन्, दम्भोलिघटि रसना, या दारुण दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमय हृदयम्, यत् संस्मृत्य यावनान् परसहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति । धिग् अस्मान, ये अद्यापि जीवामः श्वसिमः, विचरामः, आत्मन आर्य्यवंश्याश्च अभिमन्यामहे ।

P.T.O.



(8-41/5) B-5548

(iii) इदम् आकर्ण्य किञ्चित् स्मित्वेव परितः अवलोक्य च योगी जगाद सत्यं न लक्षितो मया समयवेगः । यौधिष्ठरे समये कलित--समाधिः अहं वैक्रम-समये उदस्थाम् । पुनश्च वैक्रम-समये समाधिम् आकलय्य अस्मिन् दुराचारमये समयेऽहम् उत्थितोऽस्मि । अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् संक्षिप्य कथ्यतां का दशा भारतवर्षस्य इति ।

(iv) अलं भो ! अलम् मयैव पूर्वम् अवचितानि कुसुमानि त्वं तु चिरं रात्रौ अजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणाः अत्र तडागतटे सन्ध्याम् उपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे । यां च सप्तवर्षकल्पाम् यावनत्रासेन निःशब्दः रुदतीम् परमसुन्दरीम् कलित-मानव देहामिव सरस्वती सान्त्वयन् मरन्द-मधुरा अपः पाययन्, कन्दखण्डानि भोजयन् त्वं त्रियामाया यामत्रयम् अनैषीः, सेयम् अधुना स्वपिति, उद्बुध्य च पुनस्तथैव रोदिष्यति ।

(ख) आलोचनात्मकम् उत्तरं देयम्– 1×8=8

शिवराजविजयम् आधृत्य कवेः गद्यवैशिष्ट्यं वर्णयत।

**अथवा**

'शिवराजविजयस्य आधारेण गौरसिंहस्य चरित्र-चित्रणं कुरुत ।

4. (क) केषाञ्चन् **त्रयाणां** वाक्यानां वाच्य परिवर्तनं कुरुत–

(i) अहं पत्रम् लिखामि ?

(ii) माता भोजनम् पचति ।

(iii) लता पुष्पम् चिनोति ।

(iv) बालकः कन्दुकेन क्रीडति ।

(v) रमा पुस्तकम् पठति ।

(vi) सैनिकः राष्ट्रं रक्षति । 3×2=6

(ख) **द्वयोः** पदयोः सिद्धरूपं प्रदर्शयत– 2×2=4

(i) मति + मतुप्

(ii) ज्ञान + इनि

(iii) मूर्ख + तल्

(iv) भारत + छ ।

(ग) त्रयाणां यथानिर्दिष्टानि धातुरूपाणि लिखत लट्-लकारे- 2×3=6

(i) गम् (सन्)

(ii) कृ (णिच्)

(iii) पठ् (सन्)

(iv) पा (सन्)

(v) स्था (णिच्)

(vi) लिख् (सन्)

5. (क) सूत्रद्वयं व्याख्येयम्- 2×4=8

(i) तस्य लोपः

(ii) नीचैरनुदात्तः

(iii) उपदेशेऽजनुनासिक इत्

(iv) हालोनन्तरा संयोगः ।

(ख) चतुर्णां वाक्यानां हिंदी-भाषया अनुवादं कुरुत- 2×4=8

(i) कस्मिंश्चित् वने चण्डरवः नाम शृगालः वसति स्म ।

(ii) एकदा सः आहारम् अन्विष्यन् नगरम् आगतवान् ।

(iii) तं दृष्ट्वा अनेके शुनकाः भषन्तः समीपम् आगतवन्तः ।

(iv) चण्डरवः भीत्या धावितुम् उद्युक्तः ।

(v) शुनकाः अपि तस्य अनुसरणं कृतवन्तः ।

(vi) चण्डरवः प्राणभयात् धावन् मार्गे दृष्टं रजकगृहं प्रविष्टवान् ।

(vii) तत्र नीलरसेन परिपूर्णम् एकं महाभाण्डम् आसीत् ।

(viii) चण्डरवः तस्मिन् भाण्डे पतितवान् ।

❖❖❖❖❖❖❖